KVS NVS TIER 2 TGT Sanskrit Question Paper held on 29 March 2026

1. संस्कृतसाहित्यस्य कस्मिन् कवौ त्रयो गुणाः सन्ति ?
(1) श्रीहर्षः (2) माघः (3) भासः (4) शूद्रकः

2. ऋग्वेदस्य संवादसूक्तानां प्रतिपाद्यः किं न अस्ति ?
(1) नैतिकता (2) दार्शनिकता (3) हिंसा (4) आध्यात्मिकता

3. 'वेदानां सामवेदोऽस्मि'-एतद् प्रसिद्धवाक्यं कस्मिन् ग्रन्थे प्राप्यते ?
(1) यजुर्वेदः (2) भागवत्पुराणः (3) कादम्बरी (4) श्रीमद्भगवद्गीता

4. 'कालाध्वनोरत्यन्तसंयोगे'-अधोलिखितेषु वाक्येषु उपर्युक्तसूत्रस्य उदाहरणं किं नास्ति ?
(1) संवत्सरं कल्याणी। (2) क्रोशं कुटिला नदी।
(3) मासमधीते। (4) छात्रेण ग्रन्थः पठ्यते।

5. 'इत्थम्भूतलक्षणे'-अनेन सूत्रेण कस्याः विभक्तेः प्रयोगः भवति ?
(1) सप्तमी (2) तृतीया (3) पञ्चमी (4) षष्ठी

6. अधोलिखितेषु किं प्रश्नवाचकाव्ययं नास्ति ?
(1) कुत्र (2) कदा (3) तर्हि (4) कुतः

7. शतृशानच्-इत्येतयोः प्रत्ययोः विषये किं कथनं सत्यं नास्ति ?
(1) द्वौ प्रत्ययौ क्रियायाः निरन्तरतायाः सूचकौ स्तः।
(2) शतृप्रत्ययस्य प्रयोगः आत्मनेपदीधातुभिः सह क्रियते।
(3) शानच्प्रत्ययः आत्मनेपदीधातुभिः सह प्रयुज्यते।
(4) शतृशानच्प्रत्ययान्तशब्दानां रूपाणि त्रिषु लिङ्गेषु चलन्ति।

8. ऋग्वेदे प्रमुखछन्दांसि कति सन्ति ?
(1) चत्वारि (2) अष्ट (3) अष्टादश (4) सप्त

9. कृधातोः लोट्लकारे उत्तमपुरुषएकवचनरूपं भवेत्-
(1) करवाणि (2) कुरु (3) कुर्याम् (4) अकुर्म

10. निम्नोपसर्गेषु कः विना/रहित-इत्यर्थकः नास्ति ?
(1) नि (2) निस् (3) निर् (4) वि

11. ये जनाः अविद्यामुपासते ते कुत्र प्रविशन्ति ?
(1) गृहम् (2) अन्धंतमः (3) विद्यालयम् (4) कार्यालयम्

12. 'आचार्यदेवो भव'-अस्य कथनस्य कोऽर्थः अस्ति ?
(1) आचार्यः देवतुल्यः सेवनीयः (2) आचार्यस्य नाम देवोऽस्ति
(3) आचार्यः देवस्य गृहे भवति (4) आचार्यः देवतुल्यः न भवति



Adda247


Adda247
Test Prime
ALL EXAMS, ONE SUBSCRIPTION
1,00,000+ Mock Tests
Personalised Report Card
Unlimited Re-Attempt
600+ Exam Covered
25,000+ Previous Year Papers
500% Refund
IBPS
NABARD
INDIAN RAILWAYS
ATTEMPT FREE MOCK NOW

Adda247 GET IT ON Google Play

13. '96' एतदर्थे संख्यावाचकशब्द: क: ?
(1) नवषट् (2) नवषष्टि: (3) नवतिषट् (4) षण्णवति:

14. तल् प्रत्ययविषये किं कथनं सत्यम् नास्ति ?
(1) अयं शब्दस्यादौ प्रयुज्यते। (2) अयं भाववाची प्रत्ययोऽस्ति
(3) अयं शब्दस्य अन्ते प्रयुज्यते। (4) तलप्रत्ययान्तशब्दा: सदैव स्त्रीलिङ्का: भवन्ति

15. अपादानकारकविधायकं सूत्रं चिनुत।
(1) 'भुव: प्रभव:' (2) 'भीत्रार्थानां भयहेतु:'
(3) 'ध्रुवमपायेऽपादानम्' (4) 'जनिकर्तु: प्रकृति:'

16. लक्ष्मी: कौस्तुभमणे: किं गृहीत्वा क्षीरसागरात् उद्गता ?
(1) प्रकाश: (2) सौन्दर्य: (3) नैष्ठुर्यम् (4) कोमलता

17. एकोनाशीति:-इत्यस्य संख्यावाचक-शब्दस्य कोऽर्थ: ?
(1) 97 (2) 79 (3) 18 (4) 108

18. उपसर्गाणां विषये अधोलिखितेषु किं कथनं सत्यं नास्ति ?
(1) ते शब्दा: न सन्ति अपितु शब्दांशा: भवन्ति
(2) तेषां प्रयोगेण मूल-शब्दस्य अर्थे परिवर्तनं भवति
(3) उपसर्गाणां प्रयोग: स्वतन्त्ररूपेण न क्रियते
(4) ते सर्वदा स्वतन्त्ररूपेण प्रयुज्यन्ते

19. 'न खलु वयस्तेजसो हेतु:'-अस्मिन् वाक्ये कीदृशानां जनानां विषये कथितम् ?
(1) सत्त्ववताम् (2) राज्ञाम् (3) विदुषाम् (4) उदारचरितानाम्

20. शार्दूलविक्रीडितछन्दसि अन्तिम: वर्ण: कीदृश: भवति ?
(1) लघु: (2) लघु: गुरु: च (3) गुरु: (4) लघुद्वयम्

21. 'स्फुरति हृदयं वाहय रथम्'-इत्येतत् कस्य कथनं वर्तते ?
(1) सूत: (2) देवकुलिक: (3) भरत: (4) सुधाकर:

22. 'तस्य धर्मरतेरासीद् वृद्धत्वं जरसा विना' पद्यांशेऽस्मिन् कस्य उल्लेख: अस्ति ?
(1) अज: (2) दिलीप: (3) लक्ष्मण: (4) सुतीक्ष्ण:

23. '<u>क्लैब्यं</u> मा स्म गम पार्थ'-अस्मिन् श्लोके रेखांकितशब्दस्य कोऽर्थ: नास्ति ?
(1) नपुंसकता (2) पुरुषत्वहीनता (3) कायरता (4) वीरता

24. विपश्चित: पुरुषस्य मन: कानि प्रसभं हरन्ति ?
(1) विषया: (2) पवनानि (3) इन्द्रियाणि (4) सुखानि

Adda247 GET IT ON Google Play

25. महाकविभारवेः रचनाशैलीविषये किं प्रसिद्धमस्ति ?
(1) अर्थगौरवम् (2) उपमा (3) सरलता (4) पदलालित्यम्

26. दृश् धातोः तुमुन्प्रत्यये रूपं भवति–
(1) दर्शयितुम् (2) दृश्तुम् (3) द्रष्टुम् (4) दर्शतुम्

27. पर्वतस्य कन्दरे समाधौ तिष्ठन्तं मुनिं जनाः कः न विश्वसन्ति स्म ?
(1) कपिलः (2) जैगीषव्यः (3) मार्कण्डेयः (4) कण्वः

28. उचितं विकल्पं चित्वा रिक्तस्थानं पूरयत। ________ इव राजवचनमनुगच्छति जनो भयात्।
(1) सेवकः (2) शिष्यः (3) अनुयायी (4) प्रतिशब्दकः

29. यत्नतः पीडयन् सिकतासु किं लभेत ?
(1) सोमरसः (2) तैलम् (3) विषम् (4) रजतम्

30. उभयपदार्थः समासः कः ?
(1) द्वन्द्वः (2) बहुव्रीहिः (3) तत्पुरुषः (4) द्विगुः

31. उचितं अव्ययं चित्वा रिक्तस्थानं पूरयत। एकदा कश्चित् कच्छपः ________ गच्छति स्म।
(1) च (2) शनैः (3) यदि (4) तर्हि

32. 'भीत्रार्थानां भयहेतुः' अस्मिन् सूत्रे कस्याः विभक्तेः प्रयोगः निर्दिष्टः ?
(1) चतुर्थी (2) तृतीया (3) सप्तमी (4) पञ्चमी

33. अनभिहिते कर्मणि का विभक्तिः भवति ?
(1) द्वितीया (2) सप्तमी (3) चतुर्थी (4) प्रथमा

34. मोक्षे इच्छा अस्ति–अत्र मोक्षः कीदृशः कारकः अस्ति ?
(1) सम्बन्धकारकः (2) सम्प्रदानकारकः
(3) अधिकरणकारकः (4) कर्मकारकः

35. 'प्रकल्प्य'–अत्र कः प्रत्ययः प्रयुक्तः ?
(1) यत् (2) ल्यप् (3) तव्य (4) तव्यत्

36. दिव्धातोः लोट्लकारे प्रथमपुरुषद्विवचनरूपं चिनुत–
(1) अदीव्यः (2) अदीव्यतम् (3) दीव्यताम् (4) दीव्येताम्

37. विद्वस्शब्दस्य कासु विभक्तिषु समान–रूपाणि वर्तन्ते ?
(1) प्रथमाद्विवचने, सप्तमीद्विवचने च (2) चतुर्थीद्विवचने, षष्ठीबहुवचने च
(3) तृतीयाएकवचने, सप्तमीएकवचने च (4) द्वितीयाबहुवचने, पंचमीषष्ठीएकवचने च

Adda247 GET IT ON Google Play

38. अधोलिखितेषु श्वः इत्यस्य शब्दस्य सम्यक् अर्थं चिनुत।
(1) कुक्कुरः (2) आगामिदिवसः (3) गतदिवसः (4) मृतः

39. अधोलिखितेषु किं अव्ययं भिन्नार्थकं वर्तते?
(1) शनैः (2) सम्प्रति (3) साम्प्रतम् (4) अधुना

40. 'कस्मिन् स्थाने'-इत्यस्मिन्नर्थे ________ अव्ययं समीचीनं भविष्यति-
(1) कदा (2) कुतः (3) कुत्र (4) तत्र

41. संस्कृतव्याकरणे 'हशि च'-इति सूत्रं कस्य विधानं करोति?
(1) वृद्धिः (2) उत्वम् (3) पररूपम् (4) जशत्वम्

42. नवपलाशपलाशवनम्-इत्यत्र कः अलंकारः अस्ति?
(1) रूपकम् (2) श्लेषः (3) सादृश्यम् (4) यमकम्

43. ________ शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्। अधोलिखितेषु उचितविकल्पं चित्वा रिक्तस्थानं पूरयत।
(1) उपमा (2) रूपकः (3) अनुप्रासः (4) श्लेषः

44. 'स दाधार पृथिवीं द्यामुतेमां'-मन्त्रोऽयं कस्मिन् सूक्ते उद्धृतोऽस्ति?
(1) उषस् (2) हिरण्यगर्भः (3) अग्निः (4) पृथ्वी

45. सामवेदस्य कति ब्राह्मणग्रन्थाः प्राप्यन्ते?
(1) 4 (2) 8 (3) 6 (4) 3

46. अधोलिखितेषु किं मतुप्प्रत्ययान्तं न अस्ति?
(1) गतवान् (2) श्रीमत् (3) धनवती (4) गुणवान्

47. निम्नलिखितेषु उपसर्गसंज्ञाविधायकं सूत्रं चिनुत।
(1) 'उपसर्गाः अर्थयोगे' (2) 'अर्थपरिवर्तने उपसर्गाः'
(3) 'उपसर्गाः क्रियायाम्' (4) 'उपसर्गाः क्रियायोगे'

48. गम्धातोः शतृप्रत्यये सति प्रथमाद्विवचनरूपं किं भवति?
(1) गमतौ (2) गमन्तौ (3) गच्छन्तौ (4) गच्छतौ

49. अभिज्ञानशाकुन्तले वनदेवताभिः किं न प्रदत्तम्?
(1) क्षौमम् (2) पत्राणि (3) आभरणानि (4) लाक्षारसः

50. अव्ययीभावसमासान्ते पदं किं लिङ्गकं भवति?
(1) नपुंसकलिङ्गकम् (2) स्त्रीलिङ्गकम् (3) उभयलिङ्गकम् (4) पुल्लिङ्गकम्

6207193898

Adda247 GET IT ON Google Play

51. अधोलिखितेषु शुश्रूषार्थकः धातुः कोऽस्ति ?
(1) लभ् (2) अस् (3) सेव् (4) रुध्

52. हन्धातोः लोट्लकारे प्रथमपुरुषबहुवचनं किं भवति ?
(1) हन्यात् (2) घ्नन्तु (3) घ्नन्ति (4) अहन्

53. पथिन् शब्दस्य प्रथमाविभक्तौ एकवचनरूपं किं वर्तते ?
(1) पथी (2) पथः (3) पथिनः (4) पन्थाः

54. 'वारिणे'-इत्येतत् वारि शब्दस्य कस्याः विभक्तेः रूपं वर्तते ?
(1) द्वितीया (2) चतुर्थी (3) सप्तमी (4) तृतीया

55. √अस्√भू-इत्येतयोः धातुद्वयोः कस्मिन् लकारे समानरूपाणि भवन्ति ?
(1) लट्लकारः (2) लोट्लकारः (3) विधिलिङ्लकारः (4) लट्लकारः

56. अधोलिखितेषु उचितं विकल्पं चित्वा रिक्त स्थानं पूरयत।
__________ भवभूतिरेव तनुते।
(1) भयम् (2) हास्यम् (3) कारुण्यम् (4) यशः

57. 'दीपशिखा'-इत्यनेन उपाधिना निम्नलिखितेषु कः कविः विभूषितः ?
(1) भर्तृहरिः (2) कालिदासः (3) श्रीहर्षः (4) माघः

58. उचितविकल्पं चित्वा रिक्तस्थानं पूरयत। न शोभते सभामध्ये __________ मध्ये बको यथा।
(1) उपवन (2) जल (3) गृह (4) हंस

59. आर्या-छन्दसि चतुर्थचरणे कति मात्राः भवन्ति ?
(1) 11 (2) 15 (3) 12 (4) 18

60. 'ननमयय'-इत्येतत् कस्य छन्दसः लक्षणमस्ति ?
(1) मालिनी (2) वसन्ततिलका (3) उपजाति (4) स्रग्धरा

- o O o -

Adda247
GET IT ON Google Play

No. of Printed Pages : 3

62371938

# KTG (SANSKRIT)

अनुक्रमांक Roll No. | | | | | | | | |

## Question Paper / प्रश्न-पत्र

Maximum Marks : 40

अधिकतम अंक :

1. पूर्णवाक्येन उत्तरत –
   (A) लताशब्दस्य चतुर्थीविभक्तौ एकवचने रूपं किं भवति ?
   (B) रूध्धातोः लोट्लकारे प्रथमपुरुषएकवचने किं रूपं भवति ?
   (C) वधूशब्दस्य कस्याः विभक्तेः एकवचने समानरूपं चलति ?
   (D) अद्धातोः लोट्लकारप्रथमपुरुषरूपाणि लिखतु।

2. पूर्णवाक्येन उत्तरं ददातु –
   (A) बृहदारण्यकोपनिषद् केन वेदेन सम्बद्धा ?
   (B) महर्षिपतञ्जल्यनुसारम् अथर्ववेदस्य कति शाखाः वर्तन्ते ?
   (C) किं कुर्वन्नेह जिजीविषेच्छतं समाः ?
   (D) भूमिसूक्ते कति मन्त्राः, अस्य कः ऋषिश्च ?

3. पूर्णवाक्येन उत्तरं लिखतु –
   (A) शकुन्तला केन विधिना निवृत्तकल्याणा संवृत्ता ?
   (B) लक्ष्मीः उच्चैःश्रवसः किं गुणं गृहीत्वा क्षीरसागरात् उद्गता ?
   (C) राजादिलीपस्य जन्म कस्य राज्ञः पश्चात् अभवत् ?
   (D) भरतः केन कारणेन मोहमुपगतः ?

4. पूर्णवाक्येन उत्तरत –
   (A) भगवद्गीतानुसारं योगः किं अस्ति ?
   (B) वित्तस्य कति गतयः भवन्ति ?
   (C) उत्तररामचरिते मुख्यरसः कोऽस्ति ?
   (D) मृगाः कस्य मुखे न प्रविशन्ति ?



Adda247

Adda247 GET IT ON Google Play

5. पूर्णवाक्येन उत्तरं ददातु -

(A) 'युक्तः'-इत्यस्मिन् अर्थे कः प्रत्ययः प्रयुज्यते ?

(B) भूतकालार्थे कः प्रत्ययद्वयः प्रयुज्यते ?

(C) 48-इत्यस्याः संख्यावाचकः शब्दः कः भविष्यति ?

(D) एकोनाशीतिः कस्याः संख्यायाः वाचकः अस्ति ?

6. पूर्णवाक्येन उत्तरं ददातु -

(A) तैत्तिरीयोपनिषदि काः व्याहृतयः निर्दिष्टाः ?

(B) सामवेदस्य उपवेदः कोऽस्ति ?

(C) ऋग्वेदस्य प्रमुखभाष्यकारः कोऽस्ति ?

(D) मेघदूतम् कस्मिन् छन्दसि निबद्धम् ?

7. एकवाक्येन उत्तरत -

(A) अयादिसन्धिविधायकं सूत्रं लिखतु।

(B) समासस्य कति भेदाः ? तेषां नामानि लिखतु।

(C) जगतः + त्राता = जगतस्त्राता, अस्मिन् पदे केन सूत्रेण सन्धिः कृतः ?

(D) दशाननः - एतत् कस्य समासस्य उदाहरणमस्ति ?

8. **निम्नगद्यांशं पठित्वा, दत्तप्रश्नानां पूर्णवाक्येन उत्तरं ददातु -**

कालिदासः मेघदूतं रचितवान्। मेघदूते मानसून-विज्ञानस्य अद्भुतं वर्णनम् अस्ति। मानसूनसमयः आषाढ़मासात् प्रारंभते। श्याममेघान् दृष्ट्वा सर्वेजनाः प्रसन्नाः भवन्ति। मयूराः नृत्यन्ति। मानसूनमेघाः सर्वेषां जीवानां कष्टम् अपहरन्ति। मेघानां जलम् वनस्पतिभ्यः, पशुपक्षिभ्यः किं वा सर्वेभ्यः प्राणिभ्यः जीवनं प्रयच्छति। मेघजलैः भूमेः उर्वराशक्तिः वर्धते। क्षेत्राणां सिञ्चनं भवति। गगने यदा कदा इन्द्रधनुः अपि दृश्यते। वायुः शीतलः भवति। शुष्कभूमौ वर्षायाः बिन्दवः पतन्ति। भूमेः सुगन्धितं वाष्पं निर्गच्छति। कदम्बपुष्पाणि विकसन्ति। तेषु भ्रमराः गुञ्जन्ति। हरिणाः प्रसन्नाः भूत्वा इतस्ततः धावन्ति। चातकाः जलबिन्दून् पिबन्ति। बलाकाः पंक्ति बद्ध्वा आकाशे उड्डीयन्ते। मेघदूते मेघः यक्षस्य सन्देशं नयतु इति प्रार्थितः। अतः कालिदासः वायुमार्गस्य ज्ञानवर्धकः आसीत्।

(A) मेघदूते कस्य अद्भुतं वर्णनं प्राप्यते ?

(B) मेघानां जलं केभ्यः जीवनं प्रयच्छति ?

(C) मेघः किमर्थं प्रार्थितः ?

(D) के आकाशे उड्डीयन्ते ?

निम्नगद्यांशं पठित्वा दत्तप्रश्नानां एकवाक्येन उत्तरं ददातु।

एकदा राजकुमारः सिद्धार्थः विहारार्थम् उपवनं गतः। सहसा एकं क्रन्दन-ध्वनिं श्रुत्वा सः इतस्ततः अपश्यत्। बाणेन विद्धः एकः हंसः भूमौ पतितः आसीत्। एतद् दृष्ट्वा सिद्धार्थस्य चित्तं करुणया व्याकुलं जातम्। सः धावित्वा हंसस्य शरीरात् बाणं निष्कास्य तम् अंके अधारयत्। अत्रान्तरे देवदत्तः धावन् तत्र प्राप्तः। सिद्धार्थस्य हस्ते हंसं दृष्ट्वा सः उच्चैः अवदत्-''सिद्धार्थ! एषः मम हंसः। मया बाणेन निपातितः। अतः मह्यं देहि।'' सिद्धार्थः दृढतया अवदत्-''अहं न दास्यामि। अहम् अस्य रक्षकः अस्मि।'' तदा तौ विवादं कुर्वन्तौ राजसभां गतौ। राजा सर्वं वृतान्तम् आकर्ण्य आदिशत्-''यस्य पार्श्वे हंसः आगमिष्यति तस्यैव भविष्यति।'' हंसः सिद्धार्थस्य समीपे गतवान्। सत्यमिदं-'भक्षकात् रक्षकः श्रेयान्'।

(A) भूमौ पतितः हंसः केन विद्धः ?

(B) राज्ञः आदेशानुसारं हंसः कस्य भविष्यति ?

(C) हंसं दृष्ट्वा कः उच्चैः अवदत् ?

(D) राजकुमारः उपवनं किमर्थं गतः ?

0. एतद् गद्यांशं पठित्वा, दत्तप्रश्नानां पूर्णवाक्येन उत्तरं ददातु -

तमिळनाडु प्रदेशे भारतस्य दक्षिणकोणस्य अन्ते बिन्दुरूपेण दृश्यते कन्याकुमारी। अत्र पूर्वसमुद्रस्य, दक्षिणसमुद्रस्य, पश्चिमसमुद्रस्य च सङ्गमः भवति। एते त्रयः समुद्राः भारतवर्षस्य पदतलं निरन्तरं प्रक्षालयन्ति। प्रातः सायं च सर्वदा जनानां महान् सम्मर्दः भवति। अत्र एकम् अन्यद् दर्शनीयं स्थानम् विवेकानन्द स्मारकं नाम्ना प्रसिद्धमस्ति। कन्याकुमारीतः यन्त्रचालितया नौकया विवेकानन्दस्मारकं प्रति गन्तुं शक्यते। समुद्रतीरात् प्रस्थिता नौका आदौ तिरुवल्लुवर प्रतिमायाः समीपं गच्छति। तिरुवल्लुवरमहोदयेन 'तिरुकुरल्' इति नामकः तमिळवेदः रचितः। इतः पुनः प्रयाणं कृत्वा स्मारकं प्रतिगम्यते। तत्र भूतले एकं विशिष्टं ध्यान-मन्दिरम् अस्ति यत्र अन्धकारमये प्रकोष्ठे प्रकाशमानम् 'ॐ' इति चित्रं दृश्यते। तत्र सर्वे मौनव्रतमेव धारयन्ति। समुद्रस्य स्वर्णमयं जलं, स्मारकस्य दर्शनम् सर्वमेव प्रेरणादायकं स्फूर्तिदायकम् च।

(A) तमिलवेदस्य नाम किं अस्ति ?

(B) अन्धकारमये प्रकोष्ठे 'ॐ' इति चित्रं कीदृशम् ?

(C) त्रयः समुद्राः किं प्रक्षालयन्ति ?

(D) 'कन्याकुमारी' कुत्र स्थितमस्ति ?

-000-